International Journal of Sanskrit Research 2023; 9(4): 156-162

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(4): 156-162
© 2023 IJSR
www.anantaajournal.com
Received: 21-05-2023
Accepted: 25-06-2023

**Gobinda Sahu**
Post-Research Scholar, Department of Sanskrit and Indian Culture, SCSVMV University, Enathur, Kanchipuram, Tamil Nadu, India

# दूतवाक्ये वीर रसाः

**Gobinda Sahu**

**सारांश**

**क्षेत्रम्:** संस्कृतसाहित्याकाशे ये ये कवयः तेषांकृतिरुपकं ज्योतिं प्रदाय यशः उद्घोषितवन्तः तेषु महर्षिः व्यासः अन्यतमः। रामायणात् परं तस्य कृति महाभारतम् भारतवर्षे सर्वाषु भाषासु प्रकाशिता वर्तते। दैनन्दिनजीवने मानवाः सन्मार्गणानुसरणार्थं महाभारतस्य विहितमार्गं अनुसरणं कुर्वन्ति करिष्यन्ति च। प्रायशः अधिकांश ग्रन्थाः भारतवर्षे महाभारतस्याघारेण विरचितास्ति। अत्र तावत् तस्याधारेण विरचितं शोधः दूतवाक्ये बीर रसाः इति शीर्षकः स्विकृत्य तत्र बीरः रसाः विश्लेषणात्मकरित्या इति अस्मिन् लधुशोधप्रबन्धे विहितम्।

**उपदेयता:** प्रत्येकस्य शोधस्य उपदेयता अनुभूत्य शोधकारः शोधस्य रचना करेति तद्वद् अस्य शोधस्य उपदेयता आसु पाठकानां कृते तथा साहित्यरसिकानां कृते उपादेयता अस्तीति विचिन्त्य लधुशोधप्रबन्धस्यास्य परिकल्पना कृता वर्तते।

**परिमिति:** प्रतेकस्य ग्रन्थस्य परिमितिः भवत्येव।तद्वद् लधुशोधोऽस्मिन् अपि परिमितिः वर्तते। भासविरचितं दूतवाक्ये बीररसाः लधुशोधप्रबन्धस्यास्य मुख्यविषयः भवति।

**गवेषणापद्धति:** अत्र तावत् समीक्षणात्मकं तथा विश्लेषणात्मकं गवेषणापद्धतिद्वयं अनुसृतं वर्तते।

**कूटशब्द:** व्यासः, बीररसाः, रामायणात्, महर्षिः

## प्रस्तावना

अयं रसशब्दः सर्वप्रथमं वेदेषु उल्लेखितः। यथा – दधानः कलसे रसम् इति ऋग्वेदे तथा रसो वै सः, रसं ह्येवायं लब्धाऽऽनन्दीभवति, इति तैतिरीयोपनिषदि। काव्यपरम्परायां कविताकामिन्याः निखिलेभ्यो वाच्यार्थ – लक्ष्यार्थ – गुण – रीति – वक्रोक्ति – औचित्यादिभ्यो भिन्न आत्मस्थानीयः रसः। अयमेव रसपारिजातः काव्यस्य साखाप्रशाखारुपान् सर्वान् भेदप्रभेदान् उज्जीवयति, समाह्लादयति, रसयति चेति समालोचकाः वदन्ति। अनेन विना काव्यं रसिकानां कृते निरसमनादृतं च भवति। यथोच्यते –

**Gobinda Sahu**
Post-Research Scholar, Department of Sanskrit and Indian Culture, SCSVMV University, Enathur, Kanchipuram, Tamil Nadu, India

साधुपाके विनास्वाद्यं भोजनं निर्लवणं यथा ।
तथैव निरसं काव्यं स्यान्नो रसिकतुष्टये ।।

अतोऽलौकिकविलक्षणस्यास्य रसस्य काव्यत्मत्वं सर्वैरङ्गीकृतम् । यथा -
न हि रसादृते कश्चिदर्थः प्रवर्त्तते ।। इति (ना.शा)
भरतमुनि प्रतिपाद्य स्वीकरोति यद्रस एव हि परमोत्कृष्टतया आस्वाद्यते। यथा –
रसादयो हि द्वयोरपि तयोः जीवितभूताः ।। इति

**उद्घोषयन् यत्**

काव्यस्यत्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रोञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।।
(धन्यालेके)

इत्यापि च प्रकटयन् आनन्दवर्धनाचार्यः रसस्यैवकाव्यात्मत्वं प्रतिपादयति। "रसनैव सर्वं जीवति काव्यम्" इति अभिनवगुप्तमहाभागेन, "काव्यस्यात्मानि रसादिरुपे न कस्यचिद्विमतिः" इति महिमाभट्टेन, "ये रसास्याङ्गिनो धर्माः" इति मम्मटेन, "वाक्यं रसात्मकं काव्यमि"ति विश्वनाथेन च रसस्य काव्यात्मत्वमङ्गीकृतम्। एवं च अग्निपुराणेऽपि "वाग्वैदग्धप्रधानेऽपि रस एवात्र जीवितम्" इत्यानेन रसस्य आत्मास्थानीयत्वमेव स्वीक्रियते।

**नाट्यशास्त्रकारः भरतमुनेः रसस्य लक्षणम् एवं आह विभावानुभावाव्यभिचारिसंयोगाद्रसनिष्पत्तिः**। विशेषेण भावयतीति विभावायः। अनुपश्चात् भावयतीति अनुभावः। व्यभिचरति संचरतीति व्यभिचारिभावः। रसविषये तत्रक्तो दृष्टान्त इति मनुष्यः भरत पृष्टवान्। तस्य समाधानमेवमस्ति यथा लोके सहृदयजनाः ननाव्यञ्जनौषधिद्रव्यसंयोगाद्रसान् आस्वादयन्ति, अन्ने नानाव्यञ्जनां व्यभिचारिणां च द्वारा इतोऽपि अभिनयद्वारा रसान् अभिव्यञ्ज्यते इति भरतस्य अभिप्रायः।

**काव्ये**
विभावः
अनुभावः
व्यभिचारि

**लोके**
कारणम्
कार्यम्
सहकारी

मुख्यतया भावानां द्वारा एव रसनिष्पत्तिः। अभिनयद्वारा भावानां तद्वारा अनुभावानां परिपुष्टिः तद्वारा रसनिष्पत्तिः भवतीति भरतमुनिः सम्यक्तया उक्तवान्।

**रसस्वरूपम्**

अथ कोऽयं रसः? किं वा तस्य स्वरुपं? किं वा तस्य निष्पत्ति? इत्यादिषु प्रश्नेषु समुपजृम्भमाणेषु उच्यते भरतेन यथा –
"यथा हि नाना व्यञ्जनसंस्कृतमन्नं भुञ्जानः रसानास्वादयन्ति सुमनसः पुरुषाः हर्षदींश्चाधिगच्छन्ति तथा नाना बावाभिनव्यञ्जितान् वागहगसत्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः पुरुषाः हर्षादींश्चाधिगच्छन्ति। तस्मान्नाट्ये रसेति अभिख्याता" इति। अत्र भोजनस्य कटुकषायतिक्तादिलैकिकरसवत् नाटकस्यापि रत्यादिस्थायिभावा रसा इत्युच्यन्त इति भरतस्य वचनाज्ज्ञायते।
रसगङ्गाधरे उच्यते –
समुचित – ललित – सन्निवेशचारुणा काव्येन समर्पितैः, सहृदय – हृदयं प्रविष्टैः, तदीयसहृदयतासहकृतेन, भावनाविशेषमहिम्ना, विगलितदुष्यन्तरमणीत्वादिभिरलैकिकविभावानुभाव व्यभिचारिशब्दव्यपदेश्यैः, शकुन्तलादिभिरालम्बनकारणैः, चन्द्रिकादिभिरूद्दीपनकारणैः अश्रुपातादाभिः कार्यैः, चिन्तादिभिः सरकारिभिश्च, सम्भुय

प्रादुर्भावितेनालोकिकेन व्यापारेण, तत्काल – निवर्तितानन्दांशावरणाज्ञानेतात एव प्रमुष्टपरिमितप्रमातुत्वादिनिजधर्मेण प्रमात्रा, स्वप्रकाशतया वास्तवेन, निजस्ववासना रूपोरत्यादिरेव रसः। एवं च उच्यते "रत्याद्यवच्छिन्ना भग्नावारणा चिदरेव रसः" इति। अनेन ज्ञायते यद् यदा अयं जीवात्मा परत्मानः साक्षातकारं करोति तदा सः तस्मिन् परात्मानि लीनो भवति। अयमेव परमत्मा रस इत्युच्यते। इमं रसं लब्घा जीवात्मा परमानन्दं प्राप्नोति। अमुञ्च रसं जीवात्मा भिन्नत्वेनास्वादयति।

**अस्योदाहरणं जगन्नाथेन स्पष्टं प्रतिपादितम् यथा –**

> "यथा शारावादिना पिहितः दीपः शारावादि निवृत्तौ स्वयं प्रकाशते सन्निहितान् पदार्थान् अपि प्रकाशयति, तथा आत्माचैतन्यमपि रत्यादीनम भावान् प्रकासयति" इति।

**रसानां नामानि**

**रसः**

श्रृङ्गारः

हास्यः

करुणः

रौद्रः

वीरः

भयानकः

बीभत्स

अद्भुतः

शान्तः

वात्सल्य

**देवता**

विष्णुः

प्रमथदेवता

यमः

शिवः

महेन्द्रः

कालदेवः

महाकालशिवः

गन्धर्वः

श्रीनारायण

लोकमाता

**बर्णः**

श्यामः

शुक्लः

कपोतः

रक्तः

सुवर्णः

कृष्णः

नीलः

पीतः

कुन्देन्दुशुभ्रः

पद्मागर्भसदृशः

**स्थायीभावः**

रति

हासः

शोकः

क्रोधः

उत्साह

भयः

जुगुस्पा

आश्चर्यः

शमः

**दूतवाक्ये बीर रसाः**

दूतवाक्ये मुख्यतः बीर रसस्य प्रतीयमानं भवति। यत् यथा -

> "उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैः सह ।
> मन्त्रशालां रचयति भृच्यो दुर्योधनाज्ञय।।दू.वा.२।।"

**अन्वयः**

धार्तराष्ट्राणाम्,पाण्डवैः, सह,विरोधे,उत्पन्ने,दुर्योधनाज्ञाया,भत्युः,मन्त्रशालाम्,रचयति।

**व्याख्याः**

धृतराष्ट्रसुतादयः तेषाम् पाण्डवणाम् शाकम् वैरीभाव जातेसति सुयोधनस्य आदेशेन सेवकः मन्त्रशालाम् सज्जीकरोति इति। अत्र विभावः दुर्योधनः, अनुभावः पाण्डवणाम् वैरीभावः एवं च व्यभिचारिभावाः धृतिः,उत्साहः,आवेगादि इति। अतः अत्र वीर रसः प्रतियते। उत्साहः अस्य स्थायिभावः।

"सत्यधर्मधृणायुक्तो द्यूतविभ्रष्टचेतनः ।
करोत्यपाङ्गविक्षेपैः शान्तामर्पं वृकोदरम् ।। दू.वा.८।।"

**अन्वयः**

सत्य, धर्म, घृणायुक्तः, द्यूतविभूष्टचेतनः(एषःयुधिष्टिरः) अपाङ्गविक्षेपैः, वृकोदरम्, शान्तामर्षम् करोति।

**व्याख्या**

सत्य,धर्म तथा दयादि ताभिः अन्वितः कैतवेन द्युतिपराजयेन एषः युधिष्टिरः नेत्रप्रान्तभागयोः सञ्चालनैः भीमस्य कोपः दूरीभूत करोति। अत्र विभावः भीमः, अनुभावः पराजयवरणम् एवं च व्यभिचारिभावाः धृतिः, गर्वः,अमर्षादि इति।अतः अत्र वीर रसः।

"आवासाः पर्थिवानां सुरपुरसदृशाः स्वच्छन्दविहिता विस्तीर्णाः शस्त्रशाला बहुविधकरणैः शस्त्रैरुपचिताः ।
हेषन्ते मन्दुरास्थास्तुरगवरघटा बृहन्ति करिण
ऎश्वर्यं स्फीतमेतत् स्वजनपरिभवादासन्नविलयम् ।। दू.वा.१५ ।।"

**अन्वयः**

स्वच्छन्दविहिता, पार्थिवानाम्, आवासः, सुरपुरसदृशाः,(सन्ति), बहुविधकरणैः, शास्त्रे, उपचिताः, विस्तीर्णाः,शस्रशालाः, (सन्ति) मन्दरास्थाःतुरगवरधटाः, हेपन्ते, करिणः,बृहन्ति, एतत्, स्फितम्, ऐश्वर्यम्, स्वजनपरिभवात्, आसन्नविलयम्, (आस्ते)।

**व्याख्या**

श्लोकेऽस्मिन् अर्थं एवं स्यात् बन्धुविरोधादाश्वेवास्य विनाश इति बोधयति। अत्र विभावः राजा , अनुभावः शास्त्रागारः एवं च व्यभ्चारिभावाः मतिः, धृति, आवेगादि इति हेतोः अत्र वीररसः।

"दुष्टवादी गुणद्वोषी शठः स्वजननिर्दयः ।
सुयोधनो हि मां दृाट्वा नैव कार्यं करिष्यति ।। दू.वा.१६ ।।"

**अन्वयः**

दुष्टवादी, गुणद्वेषी, शठ, स्वजननिर्दयः, सुयोधनः,माम्, दुष्टा, हि , कार्यम्, नैव, करिष्यति।

**व्याख्या**

कर्णकटु भाषते यः धृतः स्वकार्येषु दयारहित दुर्योधनः श्रीकृष्णम् अवलोक्य निश्चयः सन्धिः कथमऽपि करिष्यति इति मनसि विदधाति। अत्र विभावः दुर्योधनः , अनुभावः सन्धिप्रस्तावः एवं च व्यभिचारिभावाः धृतिः, उत्साहादि इति अत्र वीररसः।

"सुयोधनोऽयं स्वजनावमानं पराक्रमं पश्यति बालिशत्वात् ।
को नाम लोके स्वयमात्मदोषमुद्घाटयेन्नष्टघृणाः सभासु ।। दू.वा.१८।।"

**अन्वयः** अयम्, सुयोधनः, बालिशत्वात्, स्वजनावमानम्, पराक्रमम्, पस्यति, लोके को नाम नष्टघृणाः, सभासु, स्वयम्, आम्तदोषाम्, उदघाटयते।

**व्याख्या**

एषः दुर्योधनः मूर्खता हेतुः स्वबन्धुनाम् अपमानेन विक्रमम् अवलोक्यति। संसारे कः घृणा दयाऽनुकम्पायुक्ताः सः समितौ स्वयम् स्वस्य अकार्यम् उद्घोश्ययते इति। अर्थात् एवं वक्तुं शक्यते दुर्योधन सदृशं दृष्टं विहाय नान्य जन एतादुश्यकार्यं करोतीति इत्यर्थः। अत्र विभावः दुर्योधनः, अनुभावः पराक्रमः एवं च व्यभिचारिभावाः आवेगः, मतिः, अमर्षादि इति। अतः अत्र वीररसः।

"पुण्यसञ्चयसम्पाप्तामधिगम्य नृपश्रियम् ।
वञ्चयेद् यः सुहृद्बन्धून् स भवेद् विफलश्रमः ।। दू.वा.२५।।"

**अन्वयः**

यः, पुण्यसञ्चयप्राप्ताम्, नृपश्रियम्, अधिगम्य, सुहृद्बन्धून्, वञ्चयेत्, सः, विफलश्रमः,भवत्।

**व्याख्या**

श्लोकेऽस्मिन् एवं वक्तुं शक्यते यथा बन्धुभिः कृते विरोधे तवैव पराजयः सुनिश्चित इति इत्यर्थः। अत्र विभावःदुर्योधनः , अनुभावः राजलक्ष्मी एवं च व्यभिचारिभावाः धृति , मति-, आवेगादि इति अतः वीररसः।

"स्थालं तव गुरोर्भूवं कंसं प्रति न ते दया ।
कथमस्माकमेवं स्यात् तेषु नित्यापकारिषु ।। दू.वा.२६।।"

**अन्वयः**

ते, दया, तव, गुरोः, स्यालम्, भूपम्, कंसम्, प्रति, न, (आसीत्), एवन्, नित्यापकारिषु, तेषु, अस्माकम्, कथम्, स्यात्।

**व्याख्या**

अत्र विभावः दुर्योदनः, अनुभावः श्रीकृष्णस्य व्यवहारः,एवं च अनुभाव गर्वः, धृतिः, उत्साहादि व्यभिचारिभावाः। अतः अत्र वीररसः परिदृश्यते।

"कृत्वा पुत्रावियोगार्तां वहुशो जननीं मम ।
वृद्धं स्वपितरं वद्वध्वा हतोऽयं मृत्युना स्वयम् ।। दू.वा.२७।।"

**अन्वयः**

मम, जननीम्, बहुशः, पुत्रवियोगार्ताम्, कृत्वा, वृद्धम्, स्वपितरम्, बद्ध्वा, अयम्, मृत्युना, स्वयम्, हतः।

**व्याख्या**

श्लोकेऽस्मिन् विभावः दुर्योधनः, अनुभावः वासुदेवः एवं च उत्साह, आवेगादि इति व्यभिचारिभावाः। इति अत्र वीररसः। "जामातृनाशाव्यसनभितप्ते रोषाभिभूते मगधेश्वरेऽथ ।

पलायमानस्य भयातुरस्य शौर्यं तदेतत् क्क गतं तवासीत् ।। दू.वा.२८।।"

**अन्वयः** अथ, जामातृनाशव्यसनाभितप्ते, रोषाभिभूते, मगधेश्वरे, भयातुरस्य, पलायमानस्य, तव, तदेतत्, शौर्यम्, क्व, गतम्, आसीत्।

**व्याख्या**

यदि शौर्यं ते रोचते तर्हि पराक्रम काले पलायनं कथमङ्गीकृतमिति प्रश्नस्याभिप्रायः। अत्र विभावः दुर्योदनः, अनुभावः वासुदेवः एवं च व्यभिचारिभावाः गर्वः, धृतिः, आवेगादि इति। अत्र वीररसः।

"प्रहरति यदि युद्धे मारुतो भीमरुपी
प्रहरति यदि साक्षात् पार्थरुपेण शक्रः ।
पुरुषवचनदक्ष ! त्वद्वचोभिर्न दास्ये
तृणामपि पतृभुक्ते वीर्यगुप्ते स्वराज्य ।। दू.वा.३५।।"

**अन्वयः**

हे परुषवचनदक्ष, यदि, युद्धे, भीमरूपी,मारुतः, प्रहरति, यदि, पार्थरूपेण, साक्षात्, शक्रः, प्रहरतिः, (तदापि), त्वद्वचेभिः, पितृभुक्ते, वीर्यगुप्ते, स्वराज्ये, तृणम्, अपि, न, दास्ये।

**व्याख्या**

श्लोकेस्मिन् विभावः दुर्योधनः, अनुभावः वासुदेवः एवं च व्यभिचारिभावाः अमर्षः, आवेगः, मतिः इति। अत्र वीररसः।

"करितुरगनिहन्ता कंसहन्ता स कृष्णः
पशुपकुलनिवासादानुजिव्यानभिज्ञः ।
हतभुजबलवीर्यः पार्थिवानां समक्षं
स्ववचनकृतदोषो बध्यतामेषं शीघ्रम् ।। दू.वा.३९।।"

अन्वयः

करितुरगनिहन्ता, कंसहन्ता, पशुपकुलनिवासात्, आनुजीव्यानभिज्ञः, हतभुजबलवोर्यः, पार्थिवानाम्, समक्षम्, स्ववचनकृतदोषः, सः, एषः, कृष्णः, शीघ्रम्, बध्यताम्।

**व्याख्या**

श्लोकेऽस्मिन् अर्थं एवं वोधयति यथा कथं यास्यति किलः केशवः बन्धनम् इत्यर्थः। अत्र विभावः दुर्योधनम्, दुःशासनादि अनुभावः एवं च व्यभिचारिभावाः मतिः, गर्वः, उत्साहादि । अतः अत्र वीररसः।

"सृजसि यदि समन्ताद् देवमायाःस्वमायाः
प्रहरसि यदि वा त्वं दुर्निवारैः सुरास्त्रैः।
हयगजवृषभाणां पातनाज्जतदर्पो
नरपतिगणमध्ये बध्यसे त्वं मयाद्य।। दू.वा.४०।।"

**अन्वयः**

यदि, देवमायाः, स्वमायाः, समन्तात्, सृजसिः, यदि वा, त्वम्, दुर्निवारैः, सुरास्त्रैः, प्रहरसि, अद्य, नरपतिगणमध्य, हयगजवृषभाणाम्, पतात्, जातदर्पः,त्वम्, मया, बध्यसे।

**व्याख्या**

अत्र विभावः दुर्योधनः , अनुभावः श्रीकृष्णस्य कार्यकलापः , व्यभिचारिभावाः धृतिः,उत्साहादि इति। अतः अत्र वीररसः।

"मत्कार्मुकोदरविनःसृतबाणजालै-
र्विद्यक्षरत्क्षतजरञ्जितसर्वगात्रम्
पश्यन्तु पाण्डुतनयाः शिबिरोपनीतं
त्वां वाष्परुद्धनयनाःपरिनिःश्वसन्तः।। दू.वा.४१।।"

**अन्वयः**

मत्कार्मुकोदरविनिःसृतबाणजालैः,विद्धक्षरत्क्षतजरक्षित सर्वगात्रम्, शिबिरोपनीतम्,त्वाम्, वाष्परुद्धनयनाः, विनिःश्वसन्तः, पाण्डुतनयाः, पश्यन्तु।

**व्याख्या**

अत्र विभावः दुर्योधनः , अनुभावः श्रीकृष्णस्य बन्धन स्थितिः , व्यभिचारिभावाः धृतिः, उन्मादः, रोषः, उत्साहादि इति। अतः अत्र वीररसः।

**पसंहारः**

काव्यनाटकरचनाक्षेत्रे महाकविभासः अन्येषु कविषु अग्रगण्यः। तस्य रचना शैलीः गम्भिरकथावस्तु, सामाजिकचेतना, पौराणिकाख्यानगतज्ञानम् इत्यादयः गुणाः सर्वोत्कृष्टाः। प्रसादः, श्लेषः, ओजः, माधुर्यादि आलङ्कारिकगुणादिनां एवं च रसः उपरि प्रयोगेण भासः दक्षः। तस्य रचितानां नाटकानां लक्षणशास्त्रमाधारेण आधारितः लिखितश्च। नाट्यकारत्वे यद्यपि कालिदस-भवभूतिः इत्यादयः नाट्यकाराः संस्कृतसाहित्ये तेषाम् स्वकिर्तीः प्रतिपादितवन्तः, तथापि नाट्यकारः भासः तेभ्यः भिन्नः। चतुर्दशनाटकेषु स्वस्यप्रतिम्बिवं तेनेव सृष्ठुः प्रतिपादितम्। नाट्यशास्त्रादि लक्षणशास्त्रे विदितानां नियमानां सम्यक् समन्वयः भासस्य नाटकचक्रेषु अस्माभिः द्रष्टुं शक्यते। साहित्यशास्त्रभित्तिकः विविधानि उपादानानि क्षणे क्षणे एव भासस्य नाटके प्रातुं शक्यते च। भासः नाटकचक्रे मुख्यतः महाभारताश्रीत्य षड् रुपकेषु बीर रसस्य प्राचुर्यता विद्यते इति नास्ति संन्देह इति सम् ।

**सन्दर्भ**


1. साहित्यदर्पणः विश्वनाथ कविराज आचार्य शेषराज शर्मा रेग्मी चौखम्बा विद्याभवन्, वारणासी,२००५
2. अलंकारसमीक्षा डा.लक्ष्मीनारयण पुरोहितः डा.चन्दशेखर पुरोहितः नागप्रकाशक, यु. ए, जवाहारनगर,दिल्ली,१९९७
3. संस्कृतसाहित्येतिहास आचार्यरामचन्द्र मिश्रः चौखम्बा सुरभारती प्रकाशन,वारणासी,२००७
4. नाट्यशास्त्रम् भरतमुनिः पण्डित.बटुकनाथ शर्मा चौखम्बा पब्लिकेशन्स,२००५
5. दशरुपकम् धनञ्जयः डा. सुधाकर मालवीया चौखम्बा कृष्णदास अकादमी, वारणासी,२०१०
6. कुवलयानन्द श्रीमद्अप्पयदीक्षितः डा.भोलाशङ्कर व्यास चौखम्बा विद्याभवन्,वारणासी,२०१०
7. दूतवाक्य महाकविभासः श्री रामशङ्कर त्रिपाठि श्री सुन्दरलाल् जैन,मोतिलाल्,वनारसी दास,चैक् वारणासी,२७॥०७॥१९७१
8. काव्यप्रकाशः आचार्यमम्मटः सत्यब्रत सिंचौखम्बा विद्याभवन्, वारणासी,
9. भास सारकथा महाकवि भासः स्रिनिभास प्रेस्, थिरुभइयारु
10. संस्कृतवाङ्ग्यन्तप्रवेशिका सारि, चन्दन साइ, मधुवनप्रेस्, पुरि, औडिशा
11. काव्यादर्श आचार्यदण्डीः आचार्य रामचन्द्र मिश्रः चौखम्बा विद्याभवन्, वारणासी,
12. रसगङ्गाधरः पण्डितराजजगन्नाथः चौखम्बा विद्याभवन, वारणासी, २००५